# Shivaparvatisamvade Shivarahasyam

# શિવપાર્વતીસંવાદે શિવરહસ્યમ્

## Document Information

Text title : Shivaparvatisamvade Shivarahasyam

File name : shivapArvatIsaMvAdeshivarahasyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 3| 45-69||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# શિવપાર્વતીસંવાદે શિવરહસ્યમ્

દેવી -
કિં તે પ્રિયકરં શમ્ભો રહસ્ય તદ્વદસ્વ મે ।
ઇતિ પૃષ્ટો મહાદેવો જગાદ જગદમ્બિકામ્ ॥ ૪૫॥

ઈશ્વરઃ -
શ્રૃણુ ત્વમમરેશાનિ રહસ્યં મમ શઙ્કરિ ।
ધર્મપઞ્ચકમિત્યાહુઃ પઞ્ચપાતકનાશનમ્ ॥ ૪૬॥

શ્રૃણુષ્વાવહિતા ભૂત્વા જગતાં પાપનુત્તયે ॥ ૪૭॥ (પાપનુત્તમમ્)

પચેલિમતપઃફલૈરમિતજન્મસઙ્ઘાર્જિતૈઃ
 ભવે ભસિતધારણે મતિરુદેતિ વિશ્વાધિકે ।
ત્રિપુણ્ડ્રરચનાક્રમઃ કરગલાદિફાલે તથા
 ઉરોદરશિરઃથલે ભવતિ ભાગ્યપૂર્ણે જને ॥ ૪૮॥

રુદ્રાક્ષેતિ વદન્સ્પૃશન્નપિ નરો જન્તુઃ સ ગોદાનભાક્
 ધૃત્વા તચ્છતકં મહેન્દ્રસદનં પ્રાપ્યેન્દ્રસાલોક્યગઃ ।
તત્સાહસ્રધરોઽપિ તત્ર દશકં તસ્માદનન્તાક્ષધૃક્-
 બ્રાહ્મં વૈષ્ણવમૈશ્વરં પદસુખં પ્રાપ્યેશ્વરે લીયતે ॥ ૪૯॥

પઞ્ચપાતકવિનાશનં પરં પઞ્ચકોશવિનિવારણં સદા ।
પઞ્ચવક્ત્રકૃપયા શુભપ્રદં પઞ્ચમન્ત્રપરમં તથાક્ષરમ્ ॥ ૫૦॥

કુમ્ભસમ્ભવમુખૈર્મુનીશ્વરૈર્જમ્ભમારકમુખૈરમરેન્દ્રૈઃ ।
કુમ્ભવક્ત્રમુખરૈર્ગણેશ્વરૈર્દમ્ભનાશનકરં પરં મનુમ્ ॥ ૫૧॥

જપ્તમાપ્તફલદં શુભાપ્તયે સપ્તમન્ત્રકૃતધૂલનાદરૈઃ ।
ઉપ્તમુક્તિફલદં ભવભૂમ્યાં બીજમેકમનિશં શિવભક્તૈઃ ॥ ૫૨॥

શ્રીરુદ્રં યજુષાં ગણેષુ વિહિતં જપ્ત્વા પરં પ્રીતિમાન્
 મુક્તઃ પાતકસઙ્ઘતો ગિરિવરાજ્જાતે સ પુણ્યૈકભાક્ ।

તન્નમ્રાં ફલવાદસૂક્તિપરમૈર્મન્ત્રં જપન્મુક્તિભા-
ગ્ભસ્માભ્યક્તતનુસ્તથા ચ શયિતો યો ભસ્મનિષ્ઠો ભવેત્ ॥ ૫૩॥

યો રુદ્રાક્ષવિભૂતિભૂષણયુતો જપ્ત્વા પ્રિયો જાયતે
યઃ પુણ્ડ્રાન્તરધારિણે મતિરુમે નૈવાપ્નુયાત્ તત્ફલમ્ ।
જપ્ત્વાપિ શ્રુતિશેખરોત્તમપદાન્ જ્ઞાત્વાપિ તસ્યાર્થકં
લિઙ્ગેષુ પ્રથિતં સદાપચિતિજં પુણ્યં ન હિ પ્રાપ્નુયાત્ ॥ ૫૪॥

પુન્નાગનાગવકુલાર્જુનચમ્પકૈશ્ચ
મન્દારપાટલકદમ્બકવર્ણિકારૈઃ ।
જમ્બ્વામ્રદાડિમસુગન્ધિશમીશમીક-
લોધ્રોદ્ભવૈશ્ચ બકુલૈઃ કરવીરપુષ્પૈઃ ॥ ૫૫॥

પદ્માર્કૈઃ કનકૈસ્તથા દમનકૈર્બન્ધૂકકોકૈર્વકૈઃ
કુન્દૈર્જાતિકુસુમ્ભસમ્ભવસુમૈઃ સન્મલ્લિકાસમ્ભવૈઃ ।
અઙ્કોલૈર્ગિરિમલ્લિકાદિકુસુમૈઃ સત્પારિજાતાદિભિઃ
નન્ઘાવર્તમરુત્વકૈશ્ચ તુલસીસદ્દ્રોણ દૂર્વાઙ્કુરૈઃ ॥ ૫૬॥

વિષ્ણુક્રાન્ત કુશાપમાર્ગજલદૈઃ કાશૈસ્તથૈવાર્જુનૈઃ ।
કાપિત્થૈરઘહારિપત્રકબરૈર્યઃ પઞ્ચવક્ત્રાર્ચનમ્ ।
પઞ્ચબ્રહ્મનમાંસિ યસ્ય વદને સદ્યઃ સ મુક્તો ભવેત્ ॥ ૫૭॥

સહસ્રનીલોત્પલમાલયા શિવં સમુલ્લસચ્ચારુશશાઙ્કમૌલિમ્ ।
મુદા મુકુન્દાજવિમૃગ્યમૌલિપાદામ્બુજં પૂજયિતા સ ધન્યઃ ॥ ૫૮॥

યો બિલ્વોત્તમમાલયાઽનુદિવસં મન્દારમાલાદિભિ-
ર્લિઙ્ગં મઙ્ગલમેતદદ્ય સુમનઃસૌરભ્યગન્ધાયિતમ્ ।
પશ્યન્ નશ્વરપાતકોત્થશમનાદ્ વ્યાઘાતભીતિં હરે-
ન્નિર્ગુણ્ડીશુકપત્રબિલ્વજદલૈઃ સદ્ભાવલિઙ્ગોદ્ભવૈઃ ॥ ૫૯॥

વસન્તનવમલ્લિકાકુસુમદિવ્યમાલાદિભિઃ
દિનાન્તસમયોલ્લસન્મધુરગન્ધજાજીસરૈઃ ।
મહેશજનિમાર્ચનં પ્રકુરુતે પ્રદોષેતુ યઃ (મહેશકૃતમર્ચનં)
સ ચાદિભિષગુત્તમપ્રિય અઘૌઘતૂલાનલઃ ॥ ૬૦॥

બ્રહ્મા શૈલભવં હરિન્મણિભવં વિષ્ણુર્નિશાનાયકો
મુક્તાજાલમયં પ્રવાલજમુમા તામ્રોદ્ભવં ભાનુમાન્ ।

હૈરણ્યં ધનદસ્તથૈવ વરુણઃ શ્રીચન્દ્રકાન્તોદ્ભવં
વહ્નિશ્ચાન્નમયં સુપિત્તલભવં વાયુશ્ચ નીલં હરિઃ ॥ ૬૧॥

અન્યે સર્વમરુદ્ગણાશ્ચ દિતિજા ગન્ધર્વવિદ્યાધરા
યક્ષા રાક્ષસકિન્નરોરગગણા રુદ્રા મુનીનાં ગણાઃ ।
ચિત્રં ચારુ મહેશલિઙ્ગમમલં સમ્પૂજયન્ત્યાદરા-
દ્બિલ્વીકોમલપલ્લવૈર્દિવિષદો મન્દારમાલાદિભિઃ ॥ ૬૨॥

ઉત્ફુલ્લરક્તકમલૈરમલૈઃ કદમ્બૈર્નીલોત્પલૈર્વિકસિતૈઃ કુમુદૈશ્ચ નિત્યમ્ ॥ ૬૩॥

માલૂરપ્રભવૈર્નવારુણદલૈર્દૂર્વાઙ્કુરૈઃ શઙ્કરં લિઙ્ગેઽભ્યર્ચ્ય
ભવેદનેકવિભવૈર્યુક્તસ્તથા મુક્તિભાક્ ।
સાયં કુન્દમરન્દબન્ધુરલસદ્ગન્ધૌઘગન્ધીકૃતૈ-
ર્દિગ્વાતૈર્વિપિનપ્રફુલ્લસુમનોધૂલિપ્રભાભાસુરૈઃ ॥ ૬૪॥

શર્વાણીરમણાર્ચનૈઃ કૃતમતિર્મન્દારમાલાદિભિઃ
ભસ્માભ્યક્તતનુર્ભવેત્ સ સુભગો ભાવોઽપિ કશ્ચિત્ કલૌ ॥ ૬૫॥

પ્રાલ્યૈર્મધ્વાજ્યદુગ્ધપ્રભવદધિઘટૈર્નારિકેલેક્ષુસારૈઃ
રમ્ભાજમ્બીરચૂતપ્રભવફલરસૈઃ પાનસોદ્ધૂતકોશૈઃ ।
શ્રીખણ્ડદ્રવસારસાગરમહાકર્પૂરખણ્ડદ્રવૈઃ
પાટીરૈર્મૃગનાભિજાતસુરસૈઃ સચ્છર્કરાપૂરકૈઃ ॥ ૬૬॥

આસિચ્યાલિમ્પ્ય ગન્ધૈર્મૃદુતરવસનાવેષ્ટનૈર્વેષ્ટયિત્વા
નેપથ્યૈર્મણિકલ્પિતૈઃ સુમનસાં ભારૈશ્ચ બિલ્વીદલૈઃ ।
અભ્યર્ચ્યાભૂષ્ય ધૂમૈરગરુપરિમલામોદિતૈર્દીપજાલૈઃ
નૈવેદ્યૈર્બહુભક્ષભોજ્યસહિતૈસ્તામ્બૂલનીરાજનૈઃ ॥ ૬૭॥

કુન્દેન્દુપ્રતિમાનચારણગણૈઃ છત્રૈશ્ચ મુક્તાફલોદ્દામ-
સ્વર્ણપરિષ્કૃતૈર્વ્યજનજામોદોત્થવાતાર્પણૈઃ ।
આદર્શૈરતિનિર્મલૈર્મૃદુલકૈઃ સદ્વાદ્યભેદોત્થિતધ્વાનૈઃ
પ્રક્રમસંસ્તવપ્રણમનૈર્નૃત્યૈશ્ચ ગેયૈરપિ ॥ ૬૮॥

લિઙ્ગં મઙ્ગલમઙ્ગલાપતિમહાસાન્નિધ્યહેતુસ્થલે
વારં વારમઘૌઘનાશનકરં પુણ્યે પ્રદોષેઽપિ ચ ।
સમ્પૂજ્યાલોક્ય પુણ્યૈર્જનિશવતિતતૈઃ કિં વદામીશતુલ્યઃ
સ્કન્દો નન્દિશ્ચ ભૃઙ્ગિર્ગિરિશકરુણયા ધન્યધન્યઃ સ એવ ॥ ૬૯॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપાર્વતીસંવાદે શિવરહસ્યમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૩। ૪૫-૬૯॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 3. 45-69..

Notes:
Shiva describes to Devi, the DharmaPanchaka (the five signifiers of ShaivaDharma).

The shloka numbers are maintained per the referenced source text.

Proofread by Ruma Dewan

---

*Shivaparvatisamvade Shivarahasyam*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*